श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.11 - દ્વિતીય સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**પ્રાર્થના**

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**

**દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.**

**પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**

**એકાદશઃ સ્કન્ધઃ**

**.. એકાદશોऽધ્યાયઃ - ૧૧ ..**

## શ્રીભગવાનુવાચ

**બદ્ધો મુક્ત ઇતિ વ્યાખ્યા, ગુણતો મે ન વસ્તુતઃ .**

**ગુણસ્ય માયામૂલત્વાન્-ન મે મોક્ષો ન બન્ધનમ્ .. ૧..**

માયા + મૂલત્ + વાન્

**શોકમોહૌ સુખં(મ્) દુઃખં (ન્), દેહાપત્તિશ્ચ માયયા .**

**સ્વપ્નો યથાऽऽત્મનઃ(ખ્) ખ્યાતિઃ(સ્), સં(વ્)સૃતિર્ન તુ વાસ્તવી .. ૨..**

દેહાપત્ + તિશ્ચ ,સં(વ્)સૃતિર્ + ન

વિદ્યાવિદ્યે મમ તનૂ, વિદ્ધ્યુદ્ધવ શરીરિણામ્ .
મોક્ષબન્ધકરી આદ્યે, માયયા મે વિનિર્મિતે .. ૩..

વિદ્ + ધ્યુદ્ + ધવ

એકસ્યૈવ મમાં(વ્) શસ્ય, જીવસ્યૈવ મહામતે .
બન્ધોઽસ્યાવિદ્યયાનાદિર્- વિદ્યયા ચ તથેતરઃ .. ૪..

બન્ધોઽસ્ + યાવિદ્યયા + નાદિર્

અથ બદ્ધસ્ય મુક્તસ્ય, વૈલક્ષણ્યં(મ્) વદામિ તે .
વિરુદ્ધધર્મિણોસ્તાત, સ્થિતયોરેકધર્મિણિ .. ૫..

વિરુદ્ધ + ધર્મિણોસ્ + તાત , સ્થિત + યોરે + કધર્મિણિ

સુપર્ણાવેતૌ સદૃશૌ સખાયૌ,
યદૃચ્છયૈતૌ કૃતનીડૌ ચ વૃક્ષે .
એકસ્તયોઃ(ખ્) ખાદતિ પિપ્પલાન્ન-
મન્યો નિરન્નોઽપિ બલેન ભૂયાન્ .. ૬..

સુપર્ણા + વેતૌ , યદૃચ્ + છયૈતૌ ,પિપ્ + પલાન્ + ન ,નિરન્ + નોઽપિ

આત્માનમન્યં(ઞ્) ચ સ વેદ વિદ્વા-
નપિપ્પલાદો ન તુ પિપ્પલાદઃ .
યોઽવિદ્યયા યુક્ સ તુ નિત્યબદ્ધો
વિદ્યામયો યઃ(સ્) સ તુ નિત્યમુક્તઃ .. ૭..

આત્મા + નમન્યં(ઞ્) , નપિપ્ + પલાદો

દેહસ્થોઽપિ ન દેહસ્થો, વિદ્વાન્ સ્વપ્નાદ્ યથોત્થિતઃ .
અદેહસ્થોઽપિ દેહસ્થઃ(ખ્), કુમતિઃ(સ્) સ્વપ્નદૃગ્યથા .. ૮..

અદેહસ્ + થોઽપિ

ઇન્દ્રિયૈરિન્દ્રિયાર્થેષુ, ગુણૈરપિ ગુણેષુ ચ .
ગૃહ્યમાણેષ્વહં(ઙ્) કુર્યાન્- ન વિદ્વાન્ યસ્ત્વવિક્રિયઃ .. ૯..

ઇન્દ્રિયૈ + રિન્દ્રિ + યાર્થેષુ ,ગૃહ્ય + માણેષ્ + વહં(ઙ્) + કુર્યાન્ , યસ્ત્વ + વિક્રિયઃ

**દૈવાધીને શરીરેઽસ્મિન્, ગુણભાવ્યેન કર્મણા .**

**વર્તમાનોઽબુધસ્તત્ર, કર્તાસ્મીતિ  નિબદ્ધ્યતે .. ૧૦..**

વર્તમાનોઽ + બુધસ્ + તત્ર , નિબદ્ + ધ્યતે

**એવં(મ્) વિરક્તઃ(શ્) શયને, આસનાટનમજ્જને .**

**દર્શનસ્પર્શનઘ્રાણ-ભોજનશ્રવણાદિષુ .. ૧૧..**

આસના + ટન + મજ્જને ,દર્શન + સ્પર્શ + નઘ્રાણ ,ભોજન + શ્રવણા + દિષુ

**ન તથા બધ્યતે વિદ્વાં(વ્)સ્-તત્ર તત્રાદયન્ ગુણાન્ .**

**પ્રકૃતિસ્થોઽપ્યસં(વ્)સક્તો, યથા ખં(મ્) સવિતાનિલઃ .. ૧૨..**

પ્રકૃતિસ્થોઽ + પ્યસં(વ્)સક્તો

**વૈશારદ્યેક્ષયાસં(ઙ્)ગ-શિતયા છિન્નસં(વ્)શયઃ .**

**પ્રતિબુદ્ધ ઇવ સ્વપ્નાન્- નાનાત્વાદ્ વિનિવર્તતે .. ૧૩..**

વૈશા + રદ્યેક્ષયા + સં(ઙ્)ગ , છિન્ + નસં(વ્)શયઃ

**યસ્ય સ્યુર્વીતસં(ઙ્)કલ્પાઃ(ફ્), પ્રાણેન્દ્રિયમનોધિયામ્ .**

**વૃત્તયઃ(સ્) સ વિનિર્મુક્તો, દેહસ્થોઽપિ હિ તદ્ગુણૈઃ .. ૧૪..**

સ્યુર્ +  વીત + સં(ઙ્)કલ્પાઃ(ફ્) ,

પ્રાણેન્દ્રિય + મનોધિયામ્ , દેહસ્ + થોઽપિ

**યસ્યાત્મા હિં(વ્)સ્યતે હિં(વ્)સ્રૈર્-યેન કિં(ઞ્)ચિદ્ યદૃચ્છયા .**

**અર્ચ્યતે વા ક્વચિત્તત્ર, ન વ્યતિક્રિયતે બુધઃ .. ૧૫..**

હિં(વ્)સ્ +  રૈર્ ,ક્વચિત્ + તત્ર ,વ્યતિ + ક્રિયતે

**ન સ્તુવીત ન નિન્દેત, કુર્વતઃ(સ્) સાધ્વસાધુ વા .**

**વદતો ગુણદોષાભ્યાં(મ્), વર્જિતઃ(સ્) સમદૃઙ્મુનિઃ .. ૧૬..**

**ન કુર્યાન્ન વદેત્ કિં(ઞ્)ચિન્-ન ધ્યાયેત્ સાધ્વસાધુ વા .**

**આત્મારામોઽનયા વૃત્ત્યા, વિચરેજ્જડવન્મુનિઃ .. ૧૭..**

સાધ્વ + સાધુ ,આત્મા + રામોઽ + નયા ,વિચરેજ્ + જઽ + વન્મુનિઃ

શબ્દબ્રહ્મણિ નિષ્ણાતો, ન નિષ્ણાયાત્ પરે યદિ .
શ્રમસ્તસ્ય શ્રમફલો, હ્યધેનુમિવ રક્ષતઃ .. ૧૮..

શબ્દ + બ્રહ્મણિ ,હ્યધે + નુમિવ

ગાં(ન્) દુગ્ધદોહામસતીં(ઞ્) ચ ભાર્યાં(ન્),
દેહં(મ્) પરાધીનમસત્પ્રજાં(ઞ્) ચ .
વિત્તં(ન્) ત્વતીર્થીકૃતમં(ઙ્) ગ વાચં(મ્)
હીનાં(મ્) મયા રક્ષતિ દુઃખદુઃખી .. ૧૯..

દુગ્ધદોહા + મસતીં(ઞ્) ,પરાધી + નમસત્ + પ્રજાં(ઞ્) , ત્વતીર્થી + કૃતમં(ઙ્)ગ

યસ્યાં(ન્) ન મે પાવનમં(ઙ્)ગ કર્મ,
સ્થિત્યુદ્ભવપ્રાણનિરોધમસ્ય .
લીલાવતારેપ્સિતજન્મ વા સ્યાદ્-
વન્ધ્યાં(ઙ્) ગિરં(ન્) તાં(મ્) બિભૃયાન્ન ધીરઃ .. ૨૦..

સ્થિત્યુદ્ +  ભવપ્રાણ + નિરો + ધમસ્ય , લીલા + વતારેપ્ + સિતજન્મ

એવં(ઞ્) જિજ્ઞાસયાપોહ્ય, નાનાત્વભ્રમમાત્મનિ .
ઉપારમેત વિરજં(મ્), મનો મય્યર્પ્ય સર્વગે .. ૨૧..

જિજ્ઞાસયા + પોહ્ય, નાનાત્વ + ભ્રમ + માત્મનિ , મય્યર્ + પ્ય

યદ્યનીશો ધારયિતું(મ્), મનો બ્રહ્મણિ નિશ્ચલમ્ .
મયિ સર્વાણિ કર્માણિ, નિરપેક્ષઃ(સ્) સમાચર .. ૨૨..

શ્રદ્ધાલુર્મે કથાઃ(શ્) શૃણ્વન્, સુભદ્રા લોકપાવનીઃ .
ગાયન્નનુસ્મરન્ કર્મ, જન્મ ચાભિનયન્ મુહુઃ .. ૨૩..

ગાયન્ + નનુ + સ્મરન્

મદર્થે ધર્મકામાર્થા-નાચરન્ મદપાશ્રયઃ .
લભતે નિશ્ચલાં(મ્) ભક્તિં(મ્), મય્યુદ્ધવ સનાતને .. ૨૪..

મય્યુદ્ + ધવ

**સત્સં(ઙ્)ગલબ્ધયા ભક્ત્યા, મયિ માં(મ્) ય ઉપાસિતા .**

**સ વૈ મે દર્શિતં(મ્) સદ્ભિ-રં(ઞ્) જસા વિન્દતે પદમ્ .. ૨૫..**

સત્સં(ઙ્)ગ + લબ્ધયા

**ઉદ્ધવ ઉવાચ**

**સાધુસ્તવોત્તમશ્લોક, મતઃ(ખ્) કીદૃગ્વિધઃ(ફ્) પ્રભો .**

**ભક્તિસ્ત્વય્યુપયુજ્યેત, કીદૃશી સદ્ભિરાદૃતા .. ૨૬..**

સાધુસ્ + તવોત્ + તમશ્લોક , કીદૃગ્ + વિધઃ(ફ્) ,

ભક્તિસ્ + ત્વય્યુપ + યુજ્યેત , સદ્ + ભિરા + દૃતા

**એતન્મે પુરુષાધ્યક્ષ, લોકાધ્યક્ષ જગત્પ્રભો .**

**પ્રણતાયાનુરક્તાય, પ્રપન્નાય ચ કથ્યતામ્ .. ૨૭..**

પ્રણતાયા + નુરક્તાય

**ત્વં(મ્) બ્રહ્મ પરમં(મ્) વ્યોમ, પુરુષઃ(ફ્) પ્રકૃતેઃ(ફ્) પરઃ .**

**અવતીર્ણોऽસિ ભગવન્, સ્વેચ્છોપાત્તપૃથગ્વપુઃ .. ૨૮..**

સ્વેચ્છો + પાત્ + તપૃથગ્ + વપુઃ

**શ્રીભગવાનુવાચ**

**કૃપાલુરકૃતદ્રોહસ્ - તિતિક્ષુઃ(સ્) સર્વદેહિનામ્ .**

**સત્યસારોऽનવદ્યાત્મા, સમઃ(સ્) સર્વોપકારકઃ .. ૨૯..**

કૃપાલુ + રકૃત + દ્રોહસ્ ,

સત્યસારોऽ + નવદ્યાત્મા ,સર્વો + પકારકઃ

**કામૈરહતધીર્દાન્તો, મૃદુઃ(શ્) શુચિરકિં(ઞ્)ચનઃ .**

**અનીહો મિતભુક્ શાન્તઃ(સ્), સ્થિરો મચ્છરણો મુનિઃ .. ૩૦..**

કામૈ + રહતધીર્ + દાન્તો ,શુચિ + રકિં(ઞ્)ચનઃ

**અપ્રમત્તો ગભીરાત્મા, ધૃતિમાં(ઞ્)જિતષડ્ગુણઃ .**

**અમાની માનદઃ(ખ્) કલ્પો, મૈત્રઃ(ખ્) કારુણિકઃ(ખ્) કવિઃ .. ૩૧..**

ધૃતિ + માં(ઞ્)જિત + ષડ્ગુણઃ

**આજ્ઞાયૈવં(ઙ્) ગુણાન્ દોષાન્, મયાડડદિષ્ટાનપિ સ્વકાન્ .**

**ધર્માન્ સન્ત્યજ્ય યઃ(સ્) સર્વાન્, માં(મ્) ભજેત સ સત્તમઃ .. ૩૨..**

મયાડડ + દિષ્ટા + નપિ , સન્ + ત્યજ્ય

**જ્ઞાત્વાજ્ઞાત્વાથ યે વૈ માં(મ્), યાવાન્ યશ્ચાસ્મિ યાદૃશઃ .**

**ભજન્ત્યનન્યભાવેન, તે મે ભક્તતમા મતાઃ .. ૩૩..**

જ્ઞાત્વા + જ્ઞાત્વા + થ ,યશ્ + ચાસ્મિ , ભજન્ત્ય + નન્ય + ભાવેન

**મલ્લિઙ્ગમદ્ભક્તજન-દર્શનસ્પર્શનાર્ચનમ્ .**

**પરિચર્યા સ્તુતિઃ(સ્) પ્રહ્વ-ગુણકર્માનુકીર્તનમ્ .. ૩૪..**

મલ્લિઙ્ + ગમદ્ + ભક્તજન , દર્શન + સ્પર્શ + નાર્ચનમ્ , ગુણકર્મા + નુકીર્તનમ્

**મત્કથાશ્રવણે શ્રદ્ધા, મદનુધ્યાનમુદ્ધવ .**

**સર્વલાભોપહરણં(ન્), દાસ્યેનાત્મનિવેદનમ્ .. ૩૫..**

મદનુધ્યા + નમુદ્ધવ ,સર્વલાભો + પહરણં(ન્) , દાસ્યેનાત્ + મનિવેદનમ્

**મજ્જન્મકર્મકથનં(મ્) મમ પર્વાનુમોદનમ્ .**

**ગીતતાણ્ડવવાદિત્ર- ગોષ્ઠીભિર્મદ્ગૃહોત્સવઃ .. ૩૬..**

મજ્જન્મ + કર્મકથનં(મ્) ,પર્વા + નુમોદનમ્ ,

ગીત + તાણ્ડવ + વાદિત્ર , ગોષ્ઠીભિર્ + મદ્ + ગૃહોત્સવઃ

**યાત્રા બલિવિધાનં(ઞ્) ચ, સર્વવાર્ષિકપર્વસુ .**

**વૈદિકી તાન્ત્રિકી દીક્ષા, મદીયવ્રતધારણમ્ .. ૩૭..**

સર્વ + વાર્ષિ + કપર્વસુ , મદી + યવ્રત + ધારણમ્

**મમાર્ચાસ્થાપને શ્રદ્ધા, સ્વતઃ (સ્) સં(વ્) હત્ય ચોદ્યમઃ .**

**ઉદ્યાનોપવનાક્રીડ-પુરમન્દિરકર્મણિ .. ૩૮..**

મમાર્ + ચાસ્થાપને , ઉદ્યાનો + પવના + ક્રીડ , પુરમન્દિ + રકર્મણિ

**સમ્માર્જનોપલેપાભ્યાં(મ્), સેકમણ્ડલવર્તનૈઃ .**

**ગૃહશુશ્રૂષણં(મ્) મહ્યં(ન્) દાસવદ્ યદમાયયા .. ૩૯..**

સમ્માર્ જનો + પલેપાભ્યાં(મ્) , સેકમણ્ડ + લવર્તનૈઃ , ગૃહ + શુશ્રૂ + ષણં(મ્)

અમાનિત્વમદમ્ભિત્વં(ઙ્), કૃતસ્યાપરિકીર્તનમ્ .
અપિ દીપાવલોકં(મ્) મે, નોપયુઞ્જ્યાન્નિવેદિતમ્ .. નિબદ્ધ્યતે

કૃતસ્યા + પરિકીર્તનમ્ ,દીપા + વલોકં(મ્) , નોપ + યુઞ્જ્યાન્ + નિવેદિતમ્

યદ્ યદિષ્ટતમં(મ્) લોકે, યચ્ચાતિપ્રિયમાત્મનઃ .
તત્તન્નિવેદયેન્મહ્યં(ન્) તદાનન્ત્યાય કલ્પતે .. ૪૧..

યચ્ચાતિ + પ્રિય + માત્મનઃ , તત્ + તન્ + નિવેદ + યેન્ મહ્યં(ન્) , તદા + નન્ત્યાય

સૂર્યોઽગ્નિર્બ્રાહ્મણો ગાવો, વૈષ્ણવઃ(ખ્) ખં મરુજ્જલમ્ .
ભૂરાત્મા સર્વભૂતાનિ, ભદ્ર પૂજાપદાનિ મે .. ૪૨..

સૂર્યે તુ વિદ્યયા ત્રય્યા, હવિષાગ્નૌ યજેત મામ્ .
આતિથ્યેન તુ વિપ્રાગ્ર્યે, ગોષ્વં(ઙ્) ગ યવસાદિના .. ૪૩..

વૈષ્ણવે બન્ધુસત્કૃત્યા, હૃદિ ખે ધ્યાનનિષ્ઠયા .
વાયૌ મુખ્યધિયા તોયે, દ્રવ્યૈસ્તોયપુરસ્કૃતૈઃ .. ૪૪..

બન્ધુ + સત્ + કૃત્યા , ધ્યા + નનિષ્ઠયા , દ્રવ્યૈસ્ + તોય + પુરસ્કૃતૈઃ

સ્થણ્ડિલે મન્ત્રહૃદયૈર્- ભોગૈરાત્માનમાત્મનિ .
ક્ષેત્રજ્ઞં(મ્) સર્વભૂતેષુ, સમત્વેન યજેત મામ્ .. ૪૫..

ભોગૈ + રાત્મા + નમાત્મનિ

ધિષ્ણ્યેષ્વેષ્વિતિ મદ્રૂપં(મ્), શઙ્ખચક્રગદામ્બુજૈઃ .
યુક્તં(ઞ્) ચતુર્ભુજં(મ્) શાન્તં(ન્), ધ્યાયન્નર્ચેત્ સમાહિતઃ .. ૪૬..

ધિષ્ણ્યેષ્ + વેષ્વિતિ , શઙ્ખ + ચક્ર + ગદામ્બુજૈઃ ધ્યાયન્ + નર્ચેત્ + સમાહિતઃ

ઇષ્ટાપૂર્તેન મામેવં(મ્), યો યજેત સમાહિતઃ .
લભતે મયિ સદ્ભક્તિં(મ્), મત્સ્મૃતિઃ(સ્) સાધુસેવયા .. ૪૭..

પ્રાયેણ ભક્તિયોગેન, સત્સં(ઙ્)ગેન વિનોદ્ધવ .
નોપાયો વિદ્યતે સધ્ર્યઙ્ - પ્રાયણં(મ્) હિ સતામહમ્ .. ૪૮..

અથૈતત્ પરમં(ઙ્) ગુહ્યં(મ્), શૃણ્વતો યદુનન્દન .
સુગોપ્યમપિ વક્ષ્યામિ, ત્વં(મ્) મે ભૃત્યઃ(સ્) સુહૃત્ સખા .. ૪૯..

સુગોપ્ + યમપિ

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં(મ્)
સંહિતાયાં(મ્) એકાદશસ્કન્ધે એકાદશોઽધ્યાયઃ .. ૧૧..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

